**दिनाङ्क :- 11.07.2026**

**प्रात: - 06:55**

**<u>प्रधानमन्त्रिणः न्यूजीलैण्डदेशयात्रा</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य ऑकलैण्ड-नगरे न्यूजीलैण्डदेशस्य प्रधानमन्त्रिणा क्रिस्टोफर-लक्सन् इत्यनेन सह द्विपक्षीयवार्तां कुर्वन् अस्ति । उभौ नेतारौ व्यापार-वाणिज्य-रक्षाक्षेत्रेषु द्विपक्षीयसम्बन्धानां सर्वेषां पक्षाणां समीक्षां करिष्यतः।

प्रधानमन्त्री मोदी प्रमुखैः उद्योगपतिभिः क्रीडाक्षेत्रस्य विशिष्टव्यक्तिभिश्च सह अपि संवादं करिष्यति। उभयदेशयोः मध्ये सुदृढजनसम्बन्धानां प्रतीकरूपेण असौ अद्य न्यूजीलैण्डदेशे विशालं प्रवासिभारतीयसम्मेलनम् अपि सम्बोधयिष्यति।

प्रधानमन्त्री मोदी ऑस्ट्रेलिया-इण्डोनेशियादेशयोः सफलयात्रानन्तरं स्वीय त्रिराष्ट्रयात्रायाः तृतीयम् अन्तिमं च चरणम् उपेत्य ह्यः ऑकलैण्ड-नगरं सम्प्राप्तवान्। न्यूजीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर-लक्सन् विमानस्थानके प्रधानमंत्रिण: नरेन्द्रमोदिन: स्वागतं कृतवान्। भारतीयसमुदायस्य बहवः सदस्याः अपि तस्य हार्दिकं स्वागतं कृतवन्तः।

प्रधानमन्त्री मोदी न्यूजीलैण्डदेशे स्थितान् प्रवासिभारतीयान् भारतस्य समृद्धसांस्कृतिकरिक्थस्य निरन्तरं संरक्षणाय प्रशंसितवान्।

सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे असौ स्वागतसमारोहे प्रस्तुतानां सांस्कृतिककार्यक्रमाणामपि प्रशंसामकरोत् ।

**<u>आईएनएस - महेन्द्रगिरिः</u>**

भारतीयनौसेना अद्य आन्ध्रप्रदेशस्य विशाखापत्तनम-नगरे स्वीय षष्ठं प्रोजेक्ट् 17 ए इत्यस्य अन्तर्गतं स्वदेशे निर्मितं युद्धपोतं आईएनएस-महेन्द्रगिरिः (एफ–38) इति पूर्वीनौसेनादले समावेशयिष्यति। अस्य समारोहस्य अध्यक्षतां रक्षामन्त्री राजनाथसिंहः करिष्यति। अयं समारोहः भारतस्य रक्षाक्षेत्रे आत्मनिर्भरतायाः तथा स्वदेशियुद्धपोतनिर्माणस्य दिशि अन्यत् महत्त्वपूर्णं सोपानं भविष्यति।

समावेशनसमारोहस्य पूर्वसन्ध्यायां विशाखापत्तनम-नगरे आयोजिते बराखाना इत्येतस्मिन् भोज कार्यक्रमे नौसैनिकान् सम्बोधयन् रक्षामन्त्री राजनाथसिंहः हिन्दमहासागरक्षेत्रे शान्तेः स्थैर्यस्य च प्रमुखसंरक्षकरूपेण भारतस्य भूमिकां पुनः प्रतिपादितवान्।

असौ परिवर्तमानं वैश्विकसुरक्षापरिदृश्यं दृष्ट्वा राष्ट्रस्य सामुद्रिकहितानां संरक्षणाय तथा त्रिवार्णिकध्वजस्य गौरवरक्षणाय भारतीयनौसेनायाः योगदानस्य प्रशंसामकरोत्। भारतं हिन्दमहासागरप्रदेशस्य प्रमुखं उत्तरदायिराष्ट्रम् इति प्रतिपादयन् रक्षामन्त्री अवदत् यत् अस्मिन् प्रदेशे शान्तेः, स्थैर्यस्य तथा सुरक्षितसामुद्रिकपर्यावरणस्य संरक्षणं भारतस्य उत्तरदायित्वम् अस्ति।

## मेघवाल-मॉनसूनसत्रम्

संसदीय-कार्य-राज्यमन्त्री अर्जुनराम-मेघवालः सहैव डॉ. एल. मुरुगनः इत्येतौ अद्य संसद-भवन-परिसरे आगामिनः वर्षाकालीन-सत्रस्य सज्जतायाः विस्तृत-समीक्षां कृतवन्तौ। संसदः इदं महत्त्वपूर्णं सत्रम् अस्मिन्नेव मासे विंशति-दिनाङ्कादारभ्य आगस्ट-मासस्य त्रयोदश-दिनाङ्कं यावत् प्रचलिष्यति। सामाजिक-सञ्जालीय-तन्त्रांशे सूचयन् श्रीमेघवालः अवदत् यत्, अस्मिन् अवसरे आगामि-सत्रे प्रस्तुतीकरणाय निर्धारितानां प्रमुखाणां वैधानिक-कार्याणां सूक्ष्मा समीक्षा विहिता, सहै सत्रस्य सुचारु-सञ्चालनाय सम्बन्धितेभ्यः अधिकारिभ्यः आवश्यकाः दिशानिर्देशाः अपि प्रदिष्टाः।

## रेलमन्त्रालयस्य 'कवच' परियोजना

भारतीयरेलमन्त्रालयेन उत्तररेलमण्डलस्य अशीत्यधिक-षट्शत किलोमीटर-मितेशु दीर्घेषु रेलमार्गेषु स्वदेशीय-रेलसुरक्षाप्रणाल्याः 'कवच' इत्यस्य कार्यान्वयनाय षडधिक-द्विशत-कोटिरूप्यकाणां स्वीकृतिः प्रदत्ता। अस्याः परियोजनायाः उद्देश्यः रेलसुरक्षायाः परिचालनदक्षतायाश्च अभिवृद्धिः अस्ति।

अस्याः योजनायाः लक्ष्यं अधिकजनसङ्कुलेषु तथा रणनीतिकदृष्ट्या महत्त्वपूर्णेषु रेलमार्गेषु स्वदेशिसुरक्षाप्रणाल्याः विस्तारः अस्ति।

## कैलाश-मानसरोवर-यात्रा

कैलाश-मानसरोवर-यात्रायै तीर्थयात्रिणां प्रथमं दलं ह्यः उत्तराखण्ड-राज्यस्य पिथौरागढ़-मण्डलस्य लिपुलेख्-मार्गेण चीन-देशे प्रविष्टवान्। सर्वान् आवश्यकान् प्रवासान्, सीमा-

औपचारिकतां च समाप्य, I.T.B.P. इति भारत-तिब्बत-सीमा-आरक्षकस्य अधिकारिणः, सीमायां स्थितेभ्यः चीन-देशस्य अधिकारिभ्यः यात्रिणां समूहं समर्पितवन्तः।

**<u>फीफा</u>**

फीफा-विश्वकप-क्रीडायां स्पेन-देशेन गतरात्रौ संयुक्तराज्यामेरिकादेशस्य इङ्गलवुड-नगरस्य लॉस-एञ्जलिस्-क्रीडाङ्गणे द्वितीयो प्रगुपान्त्य-चक्रे बेल्जियम्-देशं द्वे-एकम् अङ्कैः पराजित्य उपान्त्यचक्रे स्वस्थानं सुनिश्चितम् अकरोत्। इतः पूर्वं, बोस्टन्-नगरे प्रथमे प्रगुपान्त्य-चक्रे, फ़्रान्स्-देशेन मोरक्को-देशस्य उपरि द्वे-शून्यं इत्याङ्कैः विजित्य उपान्त्यचक्रे प्रविष्टम्। अवशिष्टायां प्रगुपान्त्य-क्रीडायाम् अद्य रात्रौ मयामि-गार्डन्स्-इत्यत्र नार्वे-देशः इङ्ग्लेण्ड्-देशं सम्मुखीकरिष्यति। क्रीडायाः आरम्भः भारतीयसमयानुसारं प्रातः सार्द्ध-द्विवादने भविष्यति। अर्जेण्टिना श्वः कैन्सस-सिटी इत्यत्र चतुर्थे प्रगुपान्त्य-चक्रे स्विट्ज़रलैण्ड-देशं सम्मुखीकरिष्यति।